श्री षण्मुख पंचरत्न स्तुतिः

श्री षण्मुख पंचरत्न स्तुतिः

स्फुरद्विद्युद्वल्लीवलयितमगोत्संगवसतिं
भवाप्तित्तप्लुष्टानमितकरुणाजीवनवशात् |
अवंतं भक्तानामुदयकरमंभोधर इति
प्रमोदादावासं व्यतनुत मयूरोऽस्य सविधे || 1 ||

सुब्रह्मण्यो यो भवेज्ज्ञानशक्त्या
सिद्धं तस्मिंदेवसेनापतित्वं |
इत्थं शक्तिं देवसेनापतित्वं
सुब्रह्मण्यो बिभ्रदेष व्यनक्ति || 2 ||

पक्षोऽनिर्वचनीयो दक्षिण इति धियमशेषजनतायाः |
जनयति बर्ही दक्षिणनिर्वचनायोग्यपक्षयुक्तोऽयं || 3 ||

यः पक्षमनिर्वचनं याति समवलंब्य दृश्यते तेन |
ब्रह्म परात्परममलं सुब्रह्मण्याभिधं परं ज्योतिः || 4 ||

षण्मुखं हसन्मुखं सुखांबुराशिखेलनं
सन्मुनींद्रसेव्यमानपादपंकजं सदा |
मन्मथादिशत्रुवर्गनाशकं कृपांबुधिं
मन्महे मुदा हृदि प्रपन्नकल्पभूरुहं || 5 ||

इति जगद्गुरु शृंगेरीपीठाधिप श्रीचंद्रशेखरभारती श्रीपादैः विरचिता श्रीषण्मुखपंचरत्नस्तुतिः |